दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-३ ■ वर्ष-4 ■ अङ्क-244 | 1 | जुलाई 02 , 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणः आषाढ़शुक्लसप्तमी
आषाढ़ 18 प्रविष्टांशः मङ्गलमयः भवेत्


2 एनएचएआई अधिकारिणा सह प्रहारस्य विषये गडकरी रुष्टः, मुख्यमन्त्रिणा साकं वार्तां कृत्वा त्वरितकार्यविधिः याचिता

3 HP Cloudburst- मण्डीजनपदे २६३ मार्गाः, १८२२ विद्युत्परावर्तकाः अवरुद्धाः, जयरामठाकुरस्य निर्वाचनक्षेत्रे विनाशः

3 उत्तरप्रदेशस्य गोरखपुरे गुरु गोरखनाथ-आयुष-विश्वविद्यालयस्य उद्घाटनम् अकरोत् राष्ट्रपतिः द्रौपदीमुर्मूः


## केन्द्रीयमन्त्रिमण्डलेन एकलक्ष-कोटिरूप्यकाणां वृत्ति-सम्बद्ध-प्रोत्साहन-योजना अनुमोदिता,

### देशे वृत्ति-सृजनस्य वृद्धिः भविष्यति सहैव हि अनुसंधान-विकास-नवान्वेषण योजनाः अपि अनुमोदिताः

हिमसंस्कृतवार्ताः - केन्द्रीयमन्त्रिमण्डलेन सर्वक्षेत्रेषु वृत्तिसृजनमुद्दिश्य, सामाजिकसुरक्षां प्रदातुञ्च, विशेषावधानेन विनिर्माणक्षेत्रे वृत्ति-सम्बद्ध-प्रोत्साहन-योजना अनुमोदिता अस्ति। गतदिवसे नवदेहल्यां मन्त्रिमण्डलस्य निर्णयानाम् विषये सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः अवदत् यत्, प्रथमतया कार्यं कुर्वाणः कर्मचारिणः योजनान्तर्गतं एकमासस्य वेतनं पञ्चदश-सहस्ररूप्यकाणि यावच्च प्राप्स्यन्ति। सः अवदत् यत् नियोक्तृभ्यः अतिरिक्त-वृत्युत्पादनार्थं वर्षद्वयं यावत् प्रोत्साहनं प्रदास्यते, अपि च विनिर्माणक्षेत्राय वर्षद्वयं यावत् विस्तृताः लाभाः दास्यते।



योजनैषा प्रायः एकलक्ष-कोटिरूप्यकाणां वर्तते। इयं योजना वर्षेषु सार्धत्रिकोटिरूप्यकाणां वृत्यै प्रोत्साहनं प्रदातुम् सन्नद्धा अस्ति। एतेषु दशमलव द्वि उत्तरैककोटिसंख्यकाः लाभार्थिनः प्रथमवारं कार्यक्षेत्रे प्रवेशं करिष्यन्ति। योजनायाः लाभः विंशतिपञ्चविंशति वर्षस्य प्रथम-अगस्ततः विंशतिसप्तविंशति वर्षस्य एकत्रिंशजुलाई पर्यन्तं निर्मितानां कार्येषु प्रवर्तन्ते। एतदतिरिक्तं खेलो-भारतनीतीत्यभिधिया क्रीडाकौशलानां विकासाय अपि केन्द्रीय मन्त्रिमंडलेन प्रस्तावः स्वीकृतोऽस्ति। मन्त्रिणा एतदपि सूचितं यत् केन्द्रमन्त्रिमण्डलेन एकलक्ष-कोटिरूप्यकाणां निधिः अनुसंधान-विकास-नवान्वेषण-योजनाभ्यः अपि स्वीकृतमस्ति।

## “डिजिटल्-इण्डिया” एतत् अभियानं अधुना जनान्दोलनरूपेण,

### आत्मानिर्भरभारतस्य निर्माणस्य च कुञ्जीभूतास्ति - प्रधानमन्त्री नरेन्द्रमोदी

हिमसंस्कृतवार्ताः - भारतं डिजिटल्-इण्डिया इत्यभियानस्य दशवर्षं पूर्तिं परिपालयति, यद्धि श्रीमोदिना पञ्चदशोत्तर-द्विसहस्रतमवर्षे समारब्धमासीत्। प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् डिजिटल इण्डिया इति जनान्दोलनं जातम् अस्ति। डिजिटल इण्डिया इति आत्मानिर्भरभारतनिर्माणस्य केन्द्रबिन्दुः अस्ति, अनेनैव हि भारतदेशः विश्वस्य विश्वसनीयः नवान्वेषणसहभागी चास्ति। डिजिटल्-इण्डिया-कार्यक्रमस्य दशवर्षपूर्त्यावसरे ब्लाग् इति मध्ये सः अलिखत् यत् भारतं डिजिटल्-गवर्नेन्स् इत्यतः वैश्विक-डिजिटल्-नेतृत्वम् प्रति, गम्यमानमस्ति। श्रीमोदी अलिखत् यत् भारतीयानां तन्त्रज्ञानस्य उपयोगक्षमतायाः विषये सन्देहप्रकटनस्यभावः दशकेभ्यानन्तरं परिवर्तितश्च जायमानमस्ति। सः अधोरेखितवान् यत् यदा आशयः सम्यक् भवति तदा नवान्वेषणम् अशक्तान् सशक्तं करोति, अपि च सर्वसमावेशकोपायाः सीमान्तस्थानां जनानां जीवने सार्थकानि परिवर्तनानि आनयन्ति। अयमेव विश्वासः, अभिगम्यता च लोकतान्त्रीकरणस्य, समावेशिनः डिजिटलेति मूलसौकर्याणां निर्माणस्य, सर्वानपि अवसराणां निर्माणस्य चाधारम् डिजिटल्-इण्डिया इत्येनैव हि अस्थापयत् इति सः उक्तवान्।



द्विचत्वारिंशत् लक्ष-किलोमीटर्-मितं यावत् आष्टिकल्-फैबर्-केबल इतीदं, पृथिव्याः चन्द्रस्य च मध्ये एकादश-गुणितं दूरं भवति, अधुना दूरस्थग्रामान् अपि संयोजयति इति प्रधानमन्त्री अवधानं दत्तवान्। भारतस्य 5G प्रसारणं जगति द्रुततमम् अस्ति, केवलं वर्षद्वये चत्वारि दशमलव अष्ट एकं लक्षं इति बेस्-स्टेशन इति संस्थापितानि सन्ति। न केवलं नगरकेन्द्रेषु, अपितु गल्वान्, सियाचिन्, लद्दाख इत्यादिषु अग्रसैनिकस्थलेष्वपि द्रुतगत्यन्तर्जालस्य प्रसारः भवन्नस्तीति प्रधानमन्त्री अवदत्। सः अवदत् यत् भारतस्य डिजिटल्-पब्लिक्-इन्फ्रास्ट्रक्चर् इत्यस्यान्तर्गतम् आधारः, कोविन्, डिजि-लॉकर्, फास्ट्-टैग्, पी. एम्-वाणी, वन्-नेशन्-वन्-सब्स्क्रिप्शन् इत्यादयः मञ्चाः अधुना वैश्विकरूपेण स्वीकृतानि सन्ति। सः उल्लिखतवान् यत् कोविन् इत्यनेन विश्वस्य बृहत्तमं व्याक्सिनेषन्-अभियानं समर्थितं, सपाद्विशत कोट्यधिकान्प्रायः क्यू. आर्. सत्यापनयोग्यानि प्रमाणपत्राणि प्रदत्तानि। सः अवदत् यत् डिजि-लॉकर् इतीदं अधुना चतुःपंचाशत्- कोटिभ्यः उपयोक्तृभ्यः सेवां प्रददाति। श्रीमोदी अवदत् यत् भारतं एक दशमलव अष्ट लक्षात् अधिकैः स्टार्ट-अप् इति नवोद्योगविशेषैः सह वैश्विकरूपेण शीर्षत्रयेषु स्टार्ट-अप्-इकोसिस्टम्-मध्ये उद्भूतम् अस्ति। सः एतं विकासं न केवलं स्टार्ट-अप्-आन्दोलनम्, अपितु तान्त्रिक-पुनर्जागरणम् इत्यप्यवोचत्। सः ए. आई. इति प्रतिभायाः प्रवेशे तथा च ए, आई. कौशल-केन्द्रीकरणे भारतस्य युवशक्तिमपि अधोरेखितवान्। आगामिदशकः इतोऽपि अधिकपरिवर्तनशीलः भविष्यतीति श्रीमोदी सबलं प्रतिपादितवान्।

## भारत-पाकिस्तान-बन्दिनः सूचेः आदानप्रदानम्

हिमसंस्कृतवार्ताः - भारत-पाकिस्तान-देशयोः परस्परं निग्रहे स्थितानां नागरिकबन्दीनां, मत्स्यजीविनाञ्च सूचेः आदानप्रदानं जातम् । विदेशमन्त्रालयानुसारं भारतेन स्वनिग्रहे द्व्यशीत्यधिकत्रिशत नागरिकाणां एकाशीति मत्स्यजीविनां च नामानि दत्तानि । तत्रैव पाकिस्तानदेशेनापि त्रिपञ्चाशन्नागरिकाणां त्रिनवत्यधिकैकशत मत्स्यजीविनां च नामानि प्रदत्तानि । नवदेहल्यां नागरिकाणां मत्स्यजीविनां, तेषां नौकाभिः सह, पाकिस्तानस्य निग्रहात् विलुप्तानां भारतीयरक्षाकर्मचारिणां च शीघ्र मुक्त्यै, स्वदेशं प्रत्यागमनाय च आह्वानं कृतमस्ति।



## सुभाषितम्

**वश्यश्च पुत्रोऽर्थकरी च विद्या अरोगिता सज्जनसङ्गतिश्च।**
**इष्टा च भार्या वशवर्तिनी च दुःखस्य मूलोद्धरणानि पञ्च॥**

अर्थात्- अनुकूल पुत्र, अर्थकरी विद्या, निरोगी शरीर, सत्संगति तथा मनोनुकूल पत्नी - ये पांच पुरुष के दुःख को समूल नष्ट करने में सक्षम हैं।


प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं
7876636263
Watsapp संख्या मध्ये नमो नमः लिखन्तु
To get the latest h|msanskr|tvartah Da|ly Sanskr|t Newspaper every day, wr|te Hello on 7876636263 Watsapp


**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**


कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११


## अमरीका-देशः भारत-प्रशान्तप्रदेशे भारतम्

### सामरिकसहयोगी इति अमन्यत्



हिमसंस्कृतवार्ताः - अमेरिका-देशः भारत-प्रशान्तप्रदेशे प्रमुख-सामरिकसहयोगीरूपेण भारतस्य महत्त्वं पुनः दृढीकृतवान्, अपि च नवदेहली-वाशिङ्गटन्-नगरयोः मध्ये बहुप्रतीक्षित-व्यापार-व्यवहारेति घोषणायाः सन्निकटं स्तः इति दृढीकृतवान्। पत्रकारसम्मेलने संवाद-सचिवः करोलिन् लेविट् इत्येषः अस्मिन् क्षेत्रे भारतस्य भूमिकायाः प्रशंसाम् अकरोत् अनेनैव सह श्रीलेविटः अमेरिकादेशस्य राष्ट्रपतिना डोनाल्ड ट्रम्पेन प्रधानमन्त्रिणा नरेन्द्रमोदिना सह दृढं व्यक्तिगतं सम्बन्धम् अधोरेखितवान्।

# एनएचएआई अधिकारिणा सह प्रहारस्य विषये गडकरी रुष्टः, मुख्यमन्त्रिणा साकं वार्तां कृत्वा त्वरितकार्यविधिः याचिता



**हिमसंस्कृतवार्ताः- शिमला।** शिमलानगरे एनएचएआई-अधिकारिणः उपरि प्रहारं कृत्वा केन्द्रीयमन्त्री नितिनगडकरी इत्यनेन रोषः प्रकटितः। गडकरी हिमाचलस्य मुख्यमन्त्री सुखविन्दरसिंह सुखु इत्यनेन सह अस्य विषये भाषितवान्, तत्क्षणं न्यायपूर्णं कार्यविधिं कर्तुं च आग्रहं कृतवान्। गडकरी उक्तवान् यत् अस्मिन् प्रकरणे उत्तरदायित्वं सुनिश्चितं कर्तव्यं, न्यायः च विलम्बं विना प्रदातव्यः। केन्द्रीयमन्त्री 'X' इत्यत्र उल्लेखद्वारा एतां सूचनां दत्तवान्।गडकरी इत्यनेन स्वीये एक्सपटले लिखितं यत्, 'हिमाचलप्रदेशस्य पंचायतीराजमन्त्री तस्य सहकारिभिः च एनएचएआई पीआईयू शिमलाप्रबन्धकस्य अचलजिन्दलस्य उपरि कृतः जघन्यः प्रहारः अत्यन्तनिन्दनीयः विधिशासनस्य अपमानं च अस्ति।' स्वस्य आधिकारिकं कर्तव्यं निर्वहन्तः लोकसेवकस्य उपरि एतादृशः क्रूरः आघातः न केवलं व्यक्तिगतसुरक्षां संकटं जनयति अपितु संस्थागत अखण्डताम् अपि नष्टं करोति। मया प्रकरणस्य गम्भीरं संज्ञानं कृत्वा मुख्यमन्त्रिणा सह उक्तं, सर्वेषाम् अपराधिनां विरुद्धं तत्कालं अनुकरणीयं च कार्यविधिं कर्तुम् आग्रहः कृतः। उत्तरदायित्वं सुनिश्चितं कर्तव्यं, न्यायः च विलम्बं विना प्रदातव्यः।' अवधेयं वर्तते यत् एनएचएआई- अभियन्ता अचल जिन्दलः शिमलानगरस्य भट्टाकुफरं यत्र पञ्चतलीयभवनं पतितं तत्र गृहेषु स्थितिं ज्ञापयितुं प्राप्तवान् आसीत्। ततः पूर्वं पंचायतीराजमन्त्री अनिरुद्धसिंहः शिमलाग्रामीण एसडीएम, पुलिसकर्मिणः चापि स्थलं प्राप्तवन्तः आसन्। अस्मिन् काले एनएचएआई-अभियन्तारः अपि तत्स्थानं प्राप्तवन्तः आसन्। एतस्मिन् समये केचन जनाः एनएचएआई-अभियन्तृ-जनानाम् उपरि चपेटिकया मारयित्वा मुष्टिप्रहारं कृतवन्तः। एतस्मिन् समये जनानां समूहे एकः व्यक्तिः एकस्य अभियन्तुः शिरसि घटेन प्रहारं कृतवान्, येन अभियन्तुः दुर्गतिः अभवत्। अधुना आहत- अभियन्तुः उपालम्भे पुलिसस्थानके ढली इत्यत्र पंचायतीराजमन्त्रिणः विरुद्धं प्रकरणं पञ्जीकृतम्। अचल जिन्दलः स्वस्य उपालम्भे अवदत् यत्, "मन्त्री अस्मान् समीपस्थं कक्षं नीत्वा जलघटेन मां ताडितवान्, येन मम शिरः क्षतिग्रस्तः अभवत्। योगेशः हस्तक्षेपं कृतवान् तदा सः अपि ताडितः अभवत्। एसडीएम- पुलिसकर्मचारिणाम् उपस्थितौ अपि कोऽपि मम साहाय्यं न कृतवान्। शिमला पुलिसाधीक्षकः संजीव गान्धी इत्यनेन प्राथमिकी पंजीकृता इति पुष्टिः कृता।

# HP Cloudburst- मण्डीजनपदे २६३ मार्गाः, १८२२ विद्युत्परावर्तकाः अवरुद्धाः, जयरामठाकुरस्य निर्वाचनक्षेत्रे विनाशः





हिमसंस्कृतवार्ताः- मण्डी। मण्डीमण्डले प्रकृतिः विनाशं कृतवती अस्ति। अस्मिन् मण्डले कोऽपि एतादृशं क्षेत्रं नास्ति यत्र वर्षा-मेघ-विस्फोटयोः कारणेन क्षतिः नास्ति। मण्डीमण्डले राष्ट्रिय- राजमार्ग- द्वयसहिताः २६३ मार्गाः निरुद्धाः सन्ति, १८२२ विद्युत्परावर्तकाः निष्क्रिया सन्ति, २६० पेयजलयोजनानां आपूर्तिः अपि बाधिता अस्ति एतत् एव न, पूर्वमुख्यमन्त्रिणः जयराम ठाकुरस्य विधानसभाक्षेत्रस्य सराजस्य थुनागः, बगस्याडम् अन्यानि च क्षेत्राणि च अस्याः आपदायाः कारणेन महदाघातेन क्षतिग्रस्तानि अभवन्।

# सहसा जलस्तरः वर्धितः, १६ मेगावाट पटिकरी-विद्युत्परियोजना नष्टा, १२ जनाः स्वप्राणान् रक्षितवन्तः



**हिमसंस्कृतवार्ताः- मण्डी।** सोमवासरे रात्रौ प्रचण्डवृष्ट्या सराजक्षेत्रे विनाशः अभवत्। १६ मेगावाट विद्युत् परियोजना जलप्रलयेन पूर्णतया नष्टा अभवत्। जलप्रलयेन पटिकरी-जलबन्धात् आरभ्य गुहाड़े स्थितं पटिकरी-विद्युत्गृहं यावत् सर्वं नष्टम् अभवत्। विद्युत्गृहे, जलबन्धस्थले च नियुक्ताः १२ जनाः स्थानात् पलायनं कृत्वा स्वप्राणान् रक्षितवन्तः। विद्युत् परियोजनायाः एजीएम, परियोजनाप्रभारी श्यामलालः अवदत् यत् सोमवासरे रात्रौ निरन्तरं वर्षाकारणात् उपनद्याः जलस्तरः सहसा वर्धितः। किञ्चित्कालान्तरे पटिकरी-विद्युत्गृहे जलं प्रविष्टम्। तस्मिन् समये विद्युत्गृहे अष्टौ कर्मचारिणः, जलबन्धस्थले चत्वारः च रात्रौ सेवायां नियुक्ताः आसन्। सर्वे कालान्तरे पलायनं कृत्वा स्वप्राणान् रक्षितवन्तः।श्यामलालः अवदत् यत् कतिपयेषु होरासु स्थितिः अधिका अभवत्। प्रातःकाले यदा स्थितिः समीक्षिता तदा जलबन्धस्थलं विद्युत्गृहं च अन्तर्धानं जातम् आसीत्। मार्गाः सर्वथा भग्नाः अभवन्। निविदाकर्तुः यन्त्रं, टिप्परयानं, कंक्रीटयन्त्रद्वयं च प्रक्षालितम् अस्ति। २०२३ तमे वर्षे वर्षायां परियोजनायाः प्रायः २५ कोटिरूप्यकाणां हानिः अभवत् इति कथितम्। विद्युत्गृहस्य रक्षणार्थं ६ मीटरमितम् ऊर्ध्वं १५० मीटरदीर्घा च रक्षणभित्तिः अपि निर्मिता, परन्तु तस्य उपरि जलम् उत्थितम् जलगुहायाः, पैन स्टॉक इत्यस्य च विनाशस्य आंशिकी क्षतिः अभवत्।

# वर्षाकारणात् क्षतौ विशेषसाहाय्यं दद्यात् केन्द्रसर्वकारः, सांसदाः हिमाचलस्य स्वरं उत्थापयेयुः





राज्यकाङ्ग्रेसस्य अध्यक्षा पूर्वसांसदप्रतिभासिंह राज्ये अत्यधिकवृष्ट्या प्राणहानिः सम्पत्तिक्षतिः च इति गभीरा चिन्तां प्रकटितवती, जनान् सुरक्षितान् पूर्णतया सजगः च भवितुं आग्रहं कृतवती अस्ति। सा जनान् आपदाप्रबन्धन-मार्गदर्शिकानां सम्यक् अनुसरणं कर्तुं कथितवती। प्रतिभासिंह केन्द्रसर्वकारेण आह्वानं कृतवती यत् जलोपप्लवग्रस्तक्षेत्रेषु आश्रयस्य पुनर्वासकार्यस्य च कृते राज्याय आर्थिकसहायतां प्रदातव्या येन पुनर्निर्माणकार्यं त्वरितं कर्तुं शक्यते। सा अवदत् यत् अत्यधिकवृष्ट्या प्रारम्भिकसूचनानुसारम् अस्मिन् जलप्रलये ४४ तः अधिकाः जनाः, शतशः पशवः च असमये कालकवलिताः अभवन् एतदतिरिक्तं प्रचण्डवृष्ट्या कृषकाणां उद्यानपालकानां च जनानां गृहाणि, गोशालाः, नगदसस्यानि, शाकानि च नष्टानि सन्ति। राज्यस्य सर्वेषु मण्डलेषु विशेषतः मण्डी, कुल्लूः, शिमला, सोलनम् इत्यत्र निरन्तरवृष्ट्या, भूस्खलनस्य च कारणेन सर्वकारीयसम्पत्त्याः, मार्गाणां, सेतूनां च महती क्षतिः अभवत्। प्रतिभासिंह केन्द्रसर्वकारेण क्षतिग्रस्तसेतूनां, मार्गाणां पुनर्निर्माणार्थं राज्याय विशेषवित्तीयसहायतां विमोचयितुं प्रभावितानां जनानां साहाय्यार्थं च आग्रहं कृत्वा अवदत् यत् पर्वतीयक्षेत्रे इति कारणतः मार्गाः जनानां जीवनरेखाः सन्ति, अतः राज्यसर्वकारः तेषां तत्क्षणं पुनर्स्थापनार्थं युद्धपदे कार्यं कुर्वन् अस्ति। राज्यस्य जलोपप्लवप्रभावितक्षेत्रेषु आश्रयपुनर्वासकार्यं सम्पन्नं कर्तुं केन्द्रसर्वकारात् राज्यहिताय विशेषवित्तीयसहायतां विमोचयितुं सहकार्यं कर्तुं राज्यस्य सर्वेभ्यः भाजपासांसदेभ्यः अपि आग्रहं कृतवती।

# हिमाचलप्रदेशे वर्षाकारणात् राज्यस्य ५०० कोटिरूप्यकाणां हानिः अभवत्



मुख्यमन्त्री ठाकुर सुखविन्दरसिंह सुखुः अवदत् यत् मण्डीनगरे मेघविस्फोटघटनानां प्रारम्भिकमूल्यांकने प्राप्तप्रतिवेदनानुसारम् अद्यावधि वर्षाकारणात् राज्यस्य ५०० कोटिरूप्यकाणां हानिः अभवत्। मण्डीनगरे अष्टजनानाम् मृत्योः वार्ता अपि अस्ति । मुख्यमन्त्री स्वस्य विधानसभाक्षेत्रे नदौन् इत्यस्मिन् वर्षाणा क्षतिविषये कथयति स्म। मुख्यमन्त्री ब्यास-नद्याः वर्धितजलस्तरस्य अपि वृत्तान्तं कृत्वा भडोली-नगरे तत्समीपस्थे च नद्यां निर्मितस्य सेतोः स्थितिं पृच्छन् अधिकारिभ्यः प्रतिक्रियाः अपि गृहीतवान् । मुख्यमन्त्री उक्तवान् यत् ब्यास् नद्याः जलस्तरः बहु वर्धितः अस्ति। नादौन्-नगरस्य बेअस्-तटे अपि एकस्याः महिलायाः शवः प्राप्तः अस्ति । केभ्यः स्थानेभ्यः क्षतेः अद्यतनं निरन्तरं आगच्छन्ति, एतादृशौ परिस्थितौ हानेः आकङ्क्षा अधिकं वर्धयितुं शक्नोति । मौसमविभागेन आगामि २४ घण्टानां कृते अलर्टः इति अधिसूचितः अस्ति। पर्यटकानाम् आह्वानं कुर्वन् मुख्यमन्त्री अवदत् यत् पर्यटकाः नगरक्षेत्रेषु एव तिष्ठन्तु, नद्यः, धाराः, दुर्गमपर्वताः च दूरं तिष्ठन्तु। सः राज्यस्य जनानां कृते अपि आह्वानं कृतवान् यत् ते नद्यः, धाराभ्यः च ५०० मीटर् यावत् दूरं तिष्ठन्तु।

# संस्कृतभारतीद्वारा बिहारप्रान्ते विस्तारकाणां स्वाध्यायवर्गः आयोजितः




**हिमसंस्कृतवार्ताः- अंकुश कुमारः।** संस्कृतभारती बिहारप्रान्तेन १ जुलाईतः ७ जुलाईपर्यन्तं विस्तारकाणां भाविविस्तारकानां च स्वाध्यायवर्गः पद्मानगरान्तर्गतं तरेतपालीमठस्थिते राघवेन्द्र- संस्कृत- महाविद्यालये आयोज्यते स्म। वर्गस्य उद्घाटनं दिनाङ्के ०१-०७-२०२५ तमे दिवसे प्रातः १०.३० वादने साभिजनं समारम्भे सम्पन्नम्। उद्घाटनसमारम्भस्य अध्यक्षरूपेण महाविद्यालयस्य प्राचार्यः डॉ. अनिलकुमार ईश्वरः उपस्थिता आसीत्। तेन संस्कृतभाषायाः वैज्ञानिकमहत्त्वं प्रतिपाद्य, कंप्यूटर-विज्ञाने अपि संस्कृतभाषायाः उपयुक्ततां प्रतिपादयत्।

मुख्यवक्तारूपेण संस्कृतभारत्याः बिहारप्रान्तस्य संगठनमन्त्री श्रवणकुमारः भाषमाणः छात्रेभ्यः संस्कृतसंभाषणस्य अभ्यासम् आवश्यकमिति निवेदयत्। तेन यथासम्भवम् अधिकं छात्रसमूहं प्रशिक्षणवर्गे उपस्थितं भवेदिति अपि आह्वानं कृतम्।मान्य-अतिथिरूपेण डॉ. मीना सिंह महोदया मंचे उपविष्टा आसीत्। कार्यक्रमस्य आरम्भः वैदिकमङ्गलाचरणेन जातः, यः डॉ. नवनीतपाण्डेयेन सम्पादितः। संचालनकार्यं डॉ. श्रीमन्नारायणेन, धन्यवादज्ञापनं डॉ. शशिकान्तपाण्डेयेन कृतम्। समारम्भे महाविद्यालयस्य प्राध्यापकगणाः डॉ. विशाल कुमारः, डॉ. वन्दना महोदया च विभिन्नजनपदेभ्यः आगतानां भाविविस्तारकानाम् उपस्थितिः अभवत्।वर्गशिक्षकरूपेण संस्कृतभारती पटनाजिलायाः विस्तारकः अंकुशकुमारझा, मुजफ्फरपुर जिलासंयोजकः शताब्दीविस्तारकः च आचार्यः अखिलेशकुमारः च समुपस्थितौ आस्ताम्।

# उत्तरप्रदेशस्य गोरखपुरे गुरु गोरखनाथ-आयुष-विश्वविद्यालयस्य उद्घाटनम् अकरोत् राष्ट्रपतिः द्रौपदीमुर्मूः




हिमसंस्कृतवार्ताः - राष्ट्रपतिः द्रौपदीमुर्मूः इत्यनया उत्तरप्रदेशस्य गोरखपुरे गुरु-गोरखनाथ-आयुष-विश्वविद्यालयस्य उद्घाटनं विहितम्। विश्वविद्यालयं भारतस्य प्राचीनपरम्परागत-मूल्यानाम् आधुनिक केन्द्रत्वेन वर्णयन्त्या राष्ट्रपतिना उक्तं यत् एषा संस्था न केवलं उत्तरप्रदेशस्य अपितु सम्पूर्णदेशस्य स्वास्थ्यसेवाक्षेत्रे महत्वपूर्णा सिद्धा भविष्यति। राष्ट्रपतिमुर्मुः अवदत् यत् भारते योगस्य स्वास्थ्यसंरक्षणस्य च परम्परा अतिप्राचीना अस्ति। सा सप्तचत्वारिंशदधिक द्विसहस्रतमवर्षपर्यन्तं देशं विकसितं कर्तुं एतां परम्पराम् अग्रे नेतुम् आवश्यकतायाः उपरि बलं प्रदत्तवती। राष्ट्रपतिः गोरखपुरे अन्तिमेषु वर्षेषु आधारभूतसंरचनानां तीव्रविकासस्य विषये अपि प्रसन्नतां प्रकटितवती। अस्मिन् अवसरे उत्तरप्रदेशस्य राज्यपालः आनन्दी बेन पटेलः, मुख्यमन्त्री योगी आदित्यनाथश्च उपस्थितौ आस्ताम् । अस्मिन् अवसरे प्रवदन् उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः उक्तवान् यत् अस्मिन् समये राज्यस्य स्वास्थ्यस्य संस्कृतेश्च नूतनयुगारम्भः इति वर्णितववान् । मुख्यमन्त्री उक्तवान् यत् एतत् विश्वविद्यालयं स्वास्थ्यपर्यटनस्य नूतनगन्तव्यस्थानत्वेन विश्वं आकर्षयिष्यति। सः अवदत् यत् प्रत्येकस्मिन् मण्डले स्वास्थ्याय शतशय्यायुतं स्वास्थ्य-कल्याण-केन्द्रं निर्मितं भविष्यति ।

# १५ वर्षाणाम् अधिकपुरातनेभ्यः, दशवर्षाधिकेभ्यः डीजलवाहनेभ्यः दिल्लीनगरे इन्धनं न दीयते



१५ वर्षाणाम् अधिकपुरातनेभ्यः, दशवर्षाधिकेभ्यःडीजलवाहनेभ्यः दिल्लीनगरे इन्धनं न दीयते। दिल्लीसर्वकारेण अवधिसमाप्तवाहनेषु ईंधनं पूरयितुं प्रतिबन्धं कार्यान्वितुं मानकसञ्चालनप्रक्रियाः (एसओपी) अधिसूचिता। इतरथा विशेषयातायातप्रबन्धनपुलिसायुक्तः अजयचौधरी सर्वोच्चन्यायालयस्य राष्ट्रियहरिद्राचार्यन्यायाधिकरण-एनजीटी-इत्यस्य च आदेशानां अनुसरणं क्रियते इति उक्तवान्। सः अवदत् यत् यातायातपुलिसः विभिन्नेषु पेट्रोलपम्पेषु १६ वाहनानि अधिग्रहीतवती अस्ति। चौधरीमहोदयः अवदत् यत् दिल्लीनगरस्य वायुगुणवत्तायाः उन्नयनार्थम् अयं अभियानः आरब्धः अस्ति।

## "लौकिकन्यायकोशः“ "जालमत्स्यन्यायः"

जाले पतितः मत्स्यः जालात् बहिः द्रष्टुं शक्नोति किन्तु जालाद् बहिः आगन्तुं न शक्नोति। एकमेव अविद्यायाः प्रभावे वर्तमानो जनः जगतः व्यवहारान् ज्ञातुं शक्नोति आत्मानं मोचयितुं न शक्नोतिति अस्य न्यायस्य अर्थः।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्

# ।।अवधाष्टकम्।।



अवध्या नाम सा पुरी, श्रीरामस्य निवास-भूः।
सरयू तीरमध्ये या, निर्मिता पुण्यकर्मभिः॥
या वेदैः संस्तुता नित्यं, ऋषिभिः पूजिता पुरा।
या धर्मस्य सदा स्थानी, सा नः पातु शुभावहा॥
रामो यत्र वसन् पूर्वं, रराज धर्मविक्रमः।
सुग्रीवविभिषणाद्यैः, बन्धुभिः सह संयुतः॥
लक्ष्मणेन सदा सार्धं, सीतया च निवासभूः।
रामो यत्र प्रजाः रक्षन्, धर्मे स्थित्वा विरेजयत्॥
दशरथस्य पुरी या, कौसल्यायाः सुतस्य च।
तस्यां रामकथा जाता, सा मां पातु सदा मुदा॥
तत्र हनुमता भक्त्या, पूजिता जानकी सदा।
सुग्रीवेण च लीला या, कृताः रामविनोदयाः॥
भरतः तपसा यत्र, रामपादं समाश्रयत्।
शत्रुघ्नः च सदा रक्षन्, न्यवसत् धर्मसंयुतः॥
सा पुरी मम चित्तस्थां, कुर्यात् पुण्यानुभावतः।
रामराज्यं यथा तत्र, तथा मेऽस्तु गृहं सुखम्॥

**-प्रभांशु पाण्डेयः व्याकरणविभागः SSVV**

# मुख्यमन्त्री रेखा गुप्ता राष्ट्रियवैद्यदिवसस्य अवसरे देशे सर्वत्र वैद्यानां प्रति आभारं प्रकटितवती



हिमसंस्कृतवार्ताः। मुख्यमन्त्री रेखा गुप्ता राष्ट्रियवैद्यदिवसस्य अवसरे देशे सर्वत्र वैद्यानां प्रति आभारं प्रकटितवती। सा विशेषतया तान् वैद्यान् अभिवादितवती ये समाजस्य निर्धनान्, असहान्, दुर्बलान् च वर्गान् निःस्वार्थभावेन सेवन्ते।अस्मिन्नावसरे मुख्यमन्त्री लोकनायकचिकित्सालये आयोजिते कार्यक्रमे भागं ग्रहीतवती। अस्मिन् काले सा अवदत् यत् वैद्यानां योगदानं केवलं चिकित्साशास्त्रे एव सीमितं नास्ति, अपितु राष्ट्रनिर्माणस्य दृढमूलम् अस्ति। श्रीमती गुप्ता उक्तवती यत् दिल्लीसर्वकारः स्वास्थ्यक्षेत्रस्य सुदृढीकरणाय पूर्णतया प्रतिबद्धः अस्ति तथा च अस्मिन् क्रमेण राजधान्यां ३३ आयुष्मान-आरोग्यमन्दिरानि १७ जनऔषधिकेन्द्राणि च आरब्धानि सन्ति। मुख्यमन्त्री उक्तवान् यत् दिल्लीसर्वकारः आधुनिकप्रौद्योगिक्याः मूलभूतसुविधाभिः च चिकित्सालयाः सुसज्जीकरणस्य दिशि मिशनमोड्-रूपेण कार्यं कुर्वन् अस्ति। इदानीं मुख्यमन्त्री दिल्लीसचिवालये चिकित्साक्षेत्रे उत्तमं सेवां दत्तवन्तः वैद्याः सम्मानिताः। अस्मिन् अवसरे दिल्लीसर्वकारस्य मन्त्री मञ्जिन्दरसिंह सिरसा सहितम् अनेके वरिष्ठवैद्याः उपस्थिताः आसन्।



# दिल्ली विधानसभा अध्यक्षः विजेन्द्रगुप्तः धर्मशालायां बौद्धगुरुदलाईलामा इत्यनेन आशीर्वादं गृहीतवान्

**हिमसंस्कृतवार्ताः।** दिल्ली विधानसभा अध्यक्षः विजेन्द्रगुप्तः धर्मशालायां बौद्धगुरुदलाईलामा इत्यनेन सह मिलित्वा तस्य आशीर्वादं गृहीतवान्। अस्मिन् कालखण्डे गुप्तमहोदयेन विश्वशान्ति-करुणा-मानवता-समर्पितस्य बौद्धगुरुदलाई-लामायाः शाश्वतसन्देशस्य प्रति गहनं सम्मानं प्रकटितम्। सः अवदत् यत् अद्यतनसामाजिकराजनैतिकवातावरणे एतादृशाः प्रेरणादायकाः विचाराः अतीव प्रासंगिकाः सन्ति। अस्मिन् अवसरे गुप्तामहोदयेन बौद्धगुरुं दिल्लीविधानसभायां आगन्तुम् अपि आमन्त्रितम्, येन दिल्लीनगरस्य जनप्रतिनिधिः नागरिकाः च तस्य दिव्यमार्गदर्शनस्य जीवनदर्शनस्य च लाभं प्राप्नुयुः।